Shri Raghunatha Temple MSS. Library,
JAMMU

No. १६६६ / घ

Title [illegible] कारक चक्र [illegible]

Author भवानन्द सिद्धान्त वागीश.

Extent ६ पत्र Age सं. १८४३

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

९

शब्दार्थसारसङ्ग्रयं

षट्कारकविवेचनम्

~~[illegible]~~

१६६

© Dharmartha Trust J&K. Digitized by eGangotri

ॐस्वस्तिश्रीमच्छ्रीगुरुचरणकमलेभ्योनमः

का॰वा॰ १ ॐस्वस्तिश्रीगणेशायनमः ॥ ॐसरस्वत्यैनमः ॐभवानन्दवागीशायनमः ॥ नत्वाहरस्यपदद्वन्द्वंकारकार्थविनिर्ण-
यः श्रीभवानन्दसिद्धान्तवागीशेनवितन्यते तत्रक्रियानिमित्तंकारकमितितत्सामान्यलक्षणम् सम्प्रदानादेरनु-
मतिप्रकाशनद्वारैवतण्डुलस्यादानद्वारैवसम्बन्धिनोपिपाकादिक्रियानिमित्तत्वेनचैत्रस्यतण्डुलंपचतीत्या-
दौचैत्रादावतिव्याप्तिः किन्तुविभक्त्यर्थद्वाराक्रियान्वयित्वंमुख्यगौणसाधारणकारकत्वम् क्रियानिमित्तत्वस-
हितमुख्यमिति स्तोकंपचतीत्यादिक्रियाविशेषणेऽतिव्याप्तिवारणायविभक्त्यर्थद्वारेति चैत्रस्यपचतीत्यादौचैत्र-
सम्बन्धित्वंपाकेनान्वेतिषष्ठ्यानामार्थसाकाङ्क्षतया क्रियायाश्चापिकर्मादिकारकसाकाङ्क्षतया परस्पराकाङ्क्षा-
विरहात् किन्तुतण्डुलमितिपदाधारद्वारेणैवचैत्रस्यतण्डुलंपचतीत्येवान्वयबोधः ओदनस्यभोक्ताचैत्रस्यपाकइ-
त्यादौकर्मत्वकर्तृत्वाद्यर्थकत्वेनकारकविभक्तिरेवकर्तृकर्मणोःकृतीत्यनेनतद्विधानात् अतएवसम्बन्धस्यका-
रकत्वंनास्तिक्रियासंयोगादितिशाब्दिकाः यदिचगुरुविप्रतपस्विदुर्गतानांप्रतिकुर्वीतभिषक्स्वभेषजैरित्यादि-
योगेविनापिकर्माधारत्वंधात्वर्थेषष्ठ्यर्थःसम्बन्धोन्वीयतेतदाकर्तृत्वकर्मत्वादिषष्ठ्यास्तमद्वाराक्रियान्वयित्वं
कारकत्वमितितत्त्वम् । तत्रक्रियान्वयित्वंकर्तृत्वमितिवैयाकरणाः तेषामाशयः यद्धातूत्तराख्यातेनयगाद्यस-
मभिव्याहृतेनयद्धात्वर्थान्वितयद्धर्मवत्त्वंबोध्यते[illegible]तादृशधर्मवत्त्वमेवतत्क्रियाकर्तृत्वम् एवंप-
चतीत्यादौपाकानुकूलव्यापारवत्त्वम् जानातीत्यादौस्वाश्रयत्वम् नश्यतीत्यादौप्रतियोगित्वम् तत्तत्क्रियानिरूपित-
तत्तत्कर्तृत्वम् यगाद्यसमभिव्याहृतेतिकरणस्यखलेनतण्डुलस्यादौपाकजन्यफलाश्रयत्वेनतण्डुलादेर्विधाना-
मोदने त्कर्तृत्वम् कार्तिःस्थाल्योऽपिपचतीत्यादौकरणाधिकरणकर्मणांक्रियान्वितत्वेनधर्मवत्त्वेपिसधर्मोनाख्यातेनानु-
प्रतिपाद्यते यदाचतत्तद्व्यापारतामपेक्षणमाख्यातंप्रयुज्यतेकाष्ठंपचतिस्थालीपचतीत्यादौतदातेषांकर्तृत्वमिष्यते-
व तथाचपच्यतओदनःस्वयमेवेत्यादौकर्मकर्तृओदनादेःकर्मणोपिकर्तृत्वम् तत्रहिस्वहतिव्यापारजन्यपा-

© Dharmartha Trust J&K. Digitized by eGangotri

इमोदनं।

ऽभावेपि

केजन्यफलशालित्वोद्देश्येनैव रोत्तरप्रथमाया व्यापारवल्लक्षणयार्थः यद्वा व्यापारस्यामात्यशक्तस्याख्यातस्यार्थः सम
भिव्याहृतवृत्त्यादिसमभिव्याहृताख्यातार्थव्यापारे प्रथमान्तार्थस्य विशेषणतया धात्वर्थस्य च विशेष्यतयान्वयः न
त्र कर्त्राख्यातस्य व्यापारवाचित्वाद्देवदत्तो नि तन्नादृशव्यापारस्यापि पयगाद्यसमभिव्याहृताख्यातप्रतिपाद्यत्वादेवदत्तः स्व
यं पचतीति प्रयोगस्यासाधुतया तादृशव्यापारे तन्त्रस्य प्रतिपत्तिविषयतायोग्यतायाश्च नपायादिति पाचयतीत्यादौ
तु पाकानुकूलव्यापारे णिजर्थः तदनुकूलव्यापारस्याख्यातस्यार्थत्वेऽपि तदाश्रयस्य च कर्तृत्वमिति स्वतन्त्रः कर्तेति पाणिनिसूत्र
मप्येतत्परमेवेति व्याख्येयम् तन्न अचेतनेपि रथक्रमानां स्वरसतः कर्तृपदप्रयोगात् कारकान्तराप्रयोज्यत्वे सति कारका
न्तरप्रयोजकत्वम् स्वातन्त्र्यं संयोगजनके कुठारादौ नास्ति व्याप्तिरितरपरे तदप्यसत् ईश्वरप्रयोज्यत्वेनासंसारिको
नन्तक्रियायास्त्वकर्तृत्वापत्तेः अप्रयोज्यत्वं च घटादिफलानुकूलतज्जन्यव्यापाराश्रयत्वं तदा दण्डादिजन्यसंयोगादिरूप
व्यापाराश्रयत्वात् कुलालादौ व्याप्तिरव्याप्तेश्च दुर्वचमिति अन्ये त्वाहुः अनुकूलकृतिमत्त्वं कर्तृत्वम् पाकानुकूलव्यापारवत्त्व
प्रति सत्यानेपि काष्ठादेस्तान्त्रिकाणां स्वरसतः कर्तृपदाप्रयोगात् कृत्याकृत्यवदारादिनाकृधातोरर्थत्वार्थत्वेनिश्चिते
त्राश्रयार्थकत्वजन्यकृधातुसमम्नकर्तृपदस्य यत्नाश्रयबोधकत्वाच्च अचेतने च कर्तृपदप्रयोगो भाक्तः यदि चात्र विशे
ष्यककृतिजन्येनान्वयिके मन्त्रे भूतेन तन्मयाकृतमिति व्यपदेशान्नुकूलकर्तृत्वम् तदा तद्विषयत्वेनापि कृतिर्विशेषणी
या न चैवं तद्विषयककृतिमत्त्वमेव तत्कर्तृत्वमस्तु गुरुतरभारोत्तोलनादौ तद्विषयककृतिमत्त्वेऽपि तोलनक्रियायाऽनिष्प
त्तौ कर्तृपदाप्रयोगात् विषयत्वं च साध्यत्वेन बोध्यम् तेन भोजनकृते रुद्देश्यत्वेन स्वर्गादिविषयकत्वेऽपि तत्कर्तृत्वे न स्वर्ग
कर्तृत्वम् अस्मदादिकर्तृपाकादावपीश्वरस्य कर्तृत्वमिष्टमेव नन्वेवमपीश्वरः पचतीति स्यात् तथाविधविवक्षायामि
ष्टत्वात् केचित्तु कार्यत्वावच्छिन्नजन्यतानिरूपितमसाधारणमनुकूलत्वमेव ग्राह्यमित्याहुः कर्मत्वं तु न व्यापार्यत्वम्
तद्धि करणजन्यक्रियानुकूलव्यापाराश्रयत्वम् तच्च दात्रेण धान्यं लुनातीत्यादौ हस्तादिकरणव्यापार्ये दात्रेतिव्याप्तेः
नापि परसमवेतक्रियाजन्यफलशालित्वम् गमिपत्योः कर्मत्वस्य पूर्वस्मिन्देशे ग्रामजेऽत्रात्र रस्मिन्देशे स्पन्दे स्पर्शापर

© Dharmartha Trust J&K. Digitized by eGangotri

का. वा.
२

योः प्रसंगात् । नदी वर्द्धते तरस्यादौ वृद्धेरवयवोपचयस्य परंपरया तीरप्राप्तिफलकत्वात्तज्जन्यफलाश्रये तीरेऽतिव्याप्तिः । अ
त्राहुः त्यजिगमिप्रभृतीनां स्पन्दमात्रं नार्थः नहि त्यजति गच्छतीत्यत्र योः प्रतीत्योर्विशेषः कश्चिद्दृश्यते इति एवं त्यजेर्वि
भागेन गमेरुत्तरसंयोगेन पतेरधःसंयोगाद्यवच्छिन्नस्पन्दो वाच्यः तथा च तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धा
त्वर्थकर्मत्वम् । स्पन्दे वृद्धिधातोश्च फलावच्छिन्नव्यापारबोधकत्वान्न पूर्वापरयोस्तीरस्य च कर्मत्वम् फलावच्छिन्न
व्यापारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारोपपत्तेः सविषयपदार्थाभिधायिज्ञानात्यादेर्विषयित्वविशिष्टार्थ
द्यानामार्थान्वयित्वमेव गौणं सकर्मकत्वम् घटं जानातीत्यादौ द्वितीयादिना विषयत्वोपस्थितौ तत्र विषयिता
नाश्रयितावानित्यन्वयबोधात् अत एव घटस्य तोऽकर्मत्वं तदुपस्थितघटत्वेनामार्थ्यस्योद्देश्यत्वेनैवान्वयबोधात् ।
अप्रसञ्जाने पिभोजनाय घटत इति प्रयोगात् अत एव तादृशधात्वयोगे कर्मप्रत्ययाभावात् भोजने घटत इति प्रयो
गोऽत्र तत्र भूमिं प्रयाति विहगे विजहाति वृक्षमित्यादौ धात्वर्थतावच्छेदकसंयोगविभागादिरूपफलशालित्वेऽपि
स्वस्य स्वात्मानं प्रयाति त्यजतीत्यप्रयोगाद्धात्वर्थे परसमवेतत्वमपि विशेषणं देयम् न चैवमुभयकर्मजस्थले म
ल्लो मल्लं गच्छतीतिवन्मल्लः स्वात्मानं गच्छतीति प्रयोगः स्यात् भूमिं प्रयातीत्यादिलौ द्वितीयादिना परत्वं प्रकृत्यर्थे
ऽन्विकबोधाने तथा च भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्पन्दानुकूलकृतिमानित्यन्वयबोधः स्वात्मान
गच्छतीत्यादौ स्वात्मभिन्नसमवेतस्वात्मवृत्तिसंयोगजनके यत्र मल्लान्तरं गमनं तदनुकूलकृतिमत्त्वस्य स्वस्मिन्नभावे
नाऽन्वतिप्रसंगात् अत्र प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन परत्वेऽन्वयः पृथिवीं प्रया
तीति विहगस्यादौ विहगस्य पृथिवीत्वावच्छिन्नभिन्नत्वाभावादनन्वयापत्तेः प्रतियोगितामात्रेणान्वये आत्मनोऽपि स्व
प्रतियोगिकद्वित्वावच्छिन्नभिन्नत्वान्नैव दोषात् अतो द्वितीयाद्यर्थफले यद्व्यक्त्यन्वयस्तद्व्यक्तित्वावच्छिन्नप्रतियोगिता
सम्बन्धेन प्रकृत्यर्थस्य कर्माख्यातार्थफलान्वयिनः परत्वेऽन्वयः पृथिवीं प्रयातीत्यादौ यत्पृथिवीव्यक्तिवृत्तिसंयोगज २
नकत्वं प्रयाणस्य शाब्दधीविषयस्तद्व्यक्तिभिन्नत्वं विहगे वर्त्तत इति कोऽपि न दोषः पृथिवीं प्रयातीत्यादौ भूत्वेवाद्यस्येव प

© Dharmartha Trust J&K. Digitized by eGangotri

व संयोगाद्यवच्छिन्नस्पन्दशालित्वं च तस्य जनकभावसमवायेन संयोगादिस्पन्दोभयवैशिष्ट्यावगाहिशाब्दत्वम् तेन गम्यते
त्यज्यते वा ग्रामः स्वात्मस्पन्दविशेषणककर्मीभूयोऽनार्थसंयोगादिविशेष्यकशाब्दस्य समुद्भवः भावाख्यातस्थले तु गमन
मित्यादावपि संयोगाद्यवच्छिन्नस्पन्दे लक्षणयैव न चैवं लक्षणयापि त्यजिगमिभ्यां त्यागगमनयोरबोधप्रसङ्गः त्रिवा
च्यम् शक्तिलक्षणान्यतरसम्बन्धेन संयोगाद्यवच्छिन्नस्पन्दबोधकत्वाद्यथानुपपत्तिनिर्णीयानन्तरमेव गम्यादिना संयो
गाद्यवच्छिन्नस्पन्दबोधनात् एवं च परसमवेतत्वतद्वाच्यतावच्छेदकफलशालित्वं तत्तद्धात्वर्थकर्मत्वम् अत एव गमिधातोः
सर्वदेशेन कर्मत्वम् तस्य विभागरूपफलेन त्यजतः पतेरपि गुरुत्वासमवायिकारणप्रयोज्यविजातीयक्रियैवार्थः
तस्याधःसंयोगरूपफलेनान्वयः एवं दशमादेरपि व्यापारमात्रार्थत्वम् द्वितीयादिना च तत्तत्फलविशेषान्वयबोधप्र
तस्मादुः कर्म त्रिविधं प्राप्यं विकार्यं निर्वर्त्यं चेति संयोगादिक्रियाफलशालिप्राप्यम् यथा ग्रामं गच्छतीत्यादौ क्रियाज
न्यधर्मनाशकफलजनकत्वं तद्विकार्यम् यथा काष्ठं ज्वलतीत्यादौ काष्ठादिपदेन लक्षणया भस्म वा ज्वलतिना
रम्भकसंयोगविरोधिविभागहेतुः कृशानुरादिव्यापारः तथा च काष्ठावयवबृहच्छिलादिरूपविभागावच्छिन्नव्यापारानु
कूलकृतिमान् इत्यन्वयधीः एवं च प्राप्यविकार्ययोः कारकत्वान्नाशफलत्वाद्वा प्रयुक्तं कर्मत्वम् निर्वर्त्यं निष्पाद्यम् य श्य.
था कटं द्वारं वा करोति अत्र कृञः फलावच्छिन्नव्यापारबोधकत्वात्कटादेस्तादृशफलानाश्रयत्वेन गौणं कर्मत्वम् तच्च
साध्यत्वेन विषयत्वम् अत एव वीरणादेरुपादानत्वे वीरणं करोतीति न प्रयोगः प्रत्युत कटादेर्गौणकर्मत्वेपि
कारकापपत्त्यर्थं अवयवलक्षणा कटस्यासिद्धत्वेन कारणत्वात् न चैवं कदाचिद्वीरणं करोतीति स्यात् प्रयोगः स्या
दितिवाच्यम् करोति सममभिव्याहारे कर्मवाचकपदस्यावयवे निरूढलक्षणानियमादित्याहुः ओदनं पचतीत्यादौ
ओदनपदस्य तण्डुले तदवयवे लक्षणा धात्वर्थ नाक्लेदपादिपरावृत्तिफलको धस्संतापनादिः तथा च धात्वर्थताव
च्छेदकफलपादिपरावृत्तिशालित्वात् कर्मत्वम् अत्र च सर्वत्र पविपरावृत्तिरूपानन्तरपरावृत्तिर्यदा विकार्यत्वदा विकार्यमध्ये
र्यथा प्राप्यमध्ये त्वन्तर्भावः स्तोकं पचतीत्यादौ क्रियाविशेषणे द्वितीयाविशेषणविभक्तिवत्प्रयोगसाधुः धात्वर्थस्तोक

© Dharmartha Trust J&K. Digitized by eGangotri

स्वनामार्थस्वत्वाभेदेनान्वयः नामार्थधात्वर्थयोर्भेदान्वयबोधएवप्रकारीभूतविभक्त्यर्थोपस्थितेरावश्यकत्वात् नीलंघटमि
का॰ चा॰ ४ त्यादौ विशेषणविभक्तेरभेदार्थकत्वेनस्याप्यप्यभेदार्थकत्वम् करणत्वेचकारकान्तरेषु चरितार्थत्वेसन्निवेशत्वम् ॥ तत्रच
रितार्थत्वन्तु तद्व्यापारस्यव्याद्येवफलरेतत्वम् कर्मादिषि सिद्धे कुठारादिव्यापारस्यच्छिदानुकूलफलस्यप्राद्यतीतिक
रणेचरितार्थोत्वे फले कर्मापि करणेचरितार्थम् कर्माणि सिद्धे करणव्यापारसिद्धेः नहिछेद्यासिद्धौ कुठारादीनां करणा
५ नांछिदानुकूलव्यापारः संभवति अतएव करणव्यापारविषयत्वे कर्मत्वमिति शाब्दः अधिकरणमपि कर्तृकर्मान्यतरद्वा
पारद्वारा क्रियानिष्पादकम् यथा गेहे चैत्रः स्थाल्यां तण्डुलं पचतीत्यत्र चैत्रव्यापारसम्पादनेन गृहस्य तण्डुलव्यापारसम्पा
दनेन स्थाल्याश्च कारकत्वम् संप्रदानापादानयोस्तु क्रियासामान्यहेतुत्वम् दानेतु अनुमतिप्रकाशनेन कर्तृरिच्छाश्रया
द्यसंप्रदानस्य पतनाश्रयेच पत्रादौ पतनप्रतिबन्धकसंयोगनाशकविभागसमाधयापादानस्य चरितार्थत्वमेवेति प
वञ्चतदनुकूलव्यापारसहकारीकुमतज्ञनकत्वे फलायोगव्यवच्छिन्नेकारणत्वेपर्यवसितंकरणत्वमितिलक्षणम् एवंचतन्म
ते चरमकारणमेवकरणम् कुठारादौचकरणपदंगौणमिति वस्तुतस्तु व्यापारवत्कारणंकरणंतेन कुठारादेहस्ता
चनाव्याप्तिः नचैवमदृष्टद्वारा कार्यमात्रे विशेषतो ज्ञानेच्छादौ मनोयोगद्वारा मनःकारणत्वात् उपधेयसंकरस्येष्टत्वात् प॰
अनुकूलकृतिसमवायित्वलक्षणकर्तृत्वस्य निरूपककरणत्वादन्यत्वेनैव तयोर्भेदसद्भावात् कर्तृभिन्नत्वेन करणलक्षणे
विशेषणीयमित्यपि कश्चित् श्रोत्रेचात्रमितौ व्याप्तिस्मृतिः करणम् परामर्शो व्यापारः चक्षुरादेस्तु आलोकादिज्ञाने चक्षुर
दिसंयोगः श्रोत्रस्य श्रावणज्ञाने श्रोत्रमनःसंयोगो नतु शब्दो व्यापारः शब्दाभावप्रत्यक्षे तस्य व्यभिचारात् नच शब्दश्रावणे
शब्दो व्यापारः सचन श्रावणत्वावच्छिन्नं प्रति श्रोत्रत्वेन हेतुत्वात् नतु शब्दश्रावणत्वावच्छिन्नं प्रति गौरवात् अन्येतु
कुठारादेः करणे कर्तृव्यापारविषयत्वं करणत्वम् नतु फलानुकूलव्यापारवत्त्वम् कुठारादौ छिदौ छिदानुकूलकर्तृसं कर्तृ॰
योगेन तन्मनोऽत्रमनादिमत्त्वमविकलम् नचैवं स्थाल्यादेरधिकरणस्यापि कर्तृव्यापारविषयत्वात् तत्रातिव्याप्तिः उपधेयसंकर ४
स्येष्टत्वात् छिदादौ वेणयाः अपतत्वपकर्तृव्यापारविषयत्वेन हस्तादेस्तु तज्जन्यचेष्टावत्त्वेन करणत्वमिष्टमेवेति वेदयाः

© Dharmartha Trust J&K. Digitized by eGangotri

हस्तादिनाच्छिनत्तीतिप्रयोगस्य सर्वसंमतत्वात् कर्मादेर्विवक्षावशात्प्रयोगाभवत्येव तण्डुलेन स्थाल्या पाचयान्नं साधयति
गवादानं साधयति विप्राय गोदानं साधयतीति प्रयोगात् चैत्रमात्मना चैत्रेण वा पचतीत्यप्रयोगात् कर्तुः शरीरस्य च वा
रणापद्यमानसमवायित्वेनाकर्तृत्वे विशेषणं देयम् कृतिमत्त्वं च समवायेन वा वाक्यच्छेदकतया बोध्यम् तेनात्मनः शरी
रस्य च व्युदासः विशिष्टाभावाच्च हस्तादिः स्वकृतेः स्वेनव्याप्तिस्य हस्तादिसाधारणम् तत्र च पूर्वं निरुक्तमेव करणम् इत्थं च क
रणपदं स्वानार्थकमेवेत्याहुः परशुना छिनत्तीत्यादौ निरुक्तं करणत्वं तृतीयार्थः प्रकृत्यर्थस्य तत्राश्रयत्वेन धात्वर्थस्य च
छिदादेर्निरूपकत्वेनान्वयः इत्थं च परशुनिष्ठकरणतानिरूपकच्छिदानुकूलकृतिमानित्यन्वयः इति प्राञ्चः परशुना छि
नत्ति नदात्रेणेत्यादौ निरूपकत्वादेः संसर्गस्य प्रतियोगितावच्छेदकसंसर्गत्वाभावान्नञर्थान्वयानवरोधेन निरुक्तकरणता
निरूपितं जन्यत्वमेव तृतीयार्थः तत्र च निरूपकतया प्रकृत्यर्थस्याश्रयतया च धात्वर्थस्यान्वयः इत्थं च परशुनिरूपितज
न्यताश्रयच्छिदानुकूलकृतिमानित्यन्वयधीरिति नव्याः जटाभिस्तापसमद्राक्षीदित्यादौ तृतीया न करणत्वे किन्तु वि
शेषणत्वे तच्च प्रकृते वैशिष्ट्यं जटाभिस्तापसमित्यस्य जटाविशिष्टं तापसमित्यर्थः प्रत्ययोपलक्षणत्वेऽभिधानम् उपल
क्षणत्वं च बोध्यतावच्छेदकानवच्छेदकत्वे सति तत्समानाधिकरणत्वम् जटाभ्यां तापसमज्ञासीत् अत्र त्वनवच्छेदकत्वात् शमदमा
दिमत्त्वस्यैवात्तापसत्वाज्ज्ञानानतिरिक्तवृत्तित्वेनावच्छेदकत्वात् न चैवं शमदमादिना तापसः इति न स्यात् इष्टत्वात्
विवक्षावशादुक्तप्रयोगस्य इष्टत्वे च विशेषणोपलक्षणे वैशिष्ट्यमात्रेण लक्षणमपि नियामकमिति अक्ष्णा काणः
पादेन खञ्जः मुखेन त्रिलोचनः इत्यादौ येनाङ्गविकारः इति सूत्रेण तृतीया येनाङ्गेन विकारो हानिरधिकं वा तदङ्गवाच
कात्तृतीयेति सूत्रार्थः इत्थं च तृतीयायाः शक्तिमत्त्वमर्थः तत्र च प्रकृतिवैशिष्ट्यकाणादिपदार्थैकदेशे विकारेऽन्वेति
काणत्वं च बहिरवच्छेदेन चक्षुःसंयोगजनकत्वम् नात्र प्रकृत्यर्थस्य काणत्वे वैकल्यं गोलकत्वे सति विशेषणीयम् ए
केनाक्ष्णैव चक्षुषा पश्यन्नपि काण एव एकगोलके द्वितीयगोलके वा चक्षुरभावश्चेत् गोलकोपपत्ताविति तदवच्छेदेन चक्षुर
भावादिति यदि च तद्गोलावच्छेदेन चक्षुःसंयोगजनकत्वानानादेवन तत्र चाक्षुषं तदा उपरंगोलकत्वमेव काणत्वम् अक्ष्णेति पद

© Dharmartha Trust J&K. Digitized by eGangotri

का॰वा॰ समभिव्याहारस्थले चकारणपदं च तत्रान्यत्वविशिष्टस्य तत्पदार्थविशिष्टस्य वा बोधकम् अतिपदं यदा कदाचित् तत्त्वेन
५ कपदं एवं च ताद्दशगोलकवृत्तित्वं च तत्त्वसम्बन्धं उपवादेयो वा न हि विशिष्टस्य तत्कारणत्वेति वा व्यार्थः एवं च चेत्वं न त्वेन यावि
पदसंस्थानस्यान्यपादत्वत्वम् पादेनेति समभिव्याहारस्थले च ताद्दशसंस्थानसम्बन्धेन वत्वेजपदार्थः तथा च पादस्थित्रि
पत्तयोर्विधसंस्थानसम्बन्धेन तद्विशिष्टत्वं वा निमर्थः त्रिलोचनस्यान्यत्व बहुव्रीहिणा लोचनत्रयवानित्यर्थः तथा च भुवे
वृत्त्रिलोचनत्रयवानिति भुवेनत्रिलोचनत्वेति वा व्यार्थः एवमन्यत्रापि पदस्य अहणाकारणत्वात् सेवेनिरूक्ता एव पदा
र्थाः तृतीयात्वभेदे तथा च ताद्दशगोलाभिन्नं यच्चत्तत्सम्बन्धपदत्वेनातद्धानिति वा व्यार्थः भुवेन त्रिलोचनस्य चत्रि
लोचनपदेलोचनत्रयविशिष्टत्वमस्य तथा च भुवोभिन्नलोचनविशिष्टवानिति वा व्यार्थः एवं पादेन खञ्जस्त्या दा
वपि बोध्यमिति कश्चित धनेन कुलमित्यादौ तृतीयादेत्वर्थकर्तृकरणयोस्तृतीयेयं क्रियासाकाङ्क्षे निरूक्त करण
त्वे तृतीयाविहिता अत्र तु नामार्थेनापि साकाङ्क्षेत्वसामान्ये तृतीयाविति सत्त्वे एतत्तृतीयोऽतिभेदः पुत्रेण सहागतरत्या
दौ तृतीयायाः कर्तृत्वमर्थः सहशब्दस्य समभिव्याहृतक्रियायाग्गमनादित्तस्यैकवर्मादित्वैकदेशावच्छेदेनैककाल
लीनत्वसम्बन्धेन समभिव्याहृतक्रियायामन्वयः एवं च पुत्रकर्तृकागमनसमानदेशकालीनागमनकर्तेत्यन्वयः व
स्तुतस्तु सहशब्दस्यापेक्षाबुद्धिविशेषविषयत्वादित्वमर्थः तृतीयार्थोऽतिभिन्नं संख्यामात्रं वा सहार्थस्य चहं
बन्धः प्रथमान्तेन वत् तृतीयान्तेनापि समन्वयार्थं निपातातिरिक्तनामार्थयोरभेदान्वयस्य विभक्त्यर्थद्वारकत्वात् भादि
त्यावच्छेदेन सर्वत्र विधेयान्वयः एवं च पुत्रेण सहागतश्चैत्रस्यत्र पुत्रवृत्तिसाहित्यावच्छिन्न चैत्रगमनकर्तृत्वमन्वयधीः
नेत्रशितिलेरणसदोपाध्याययोब्राह्मणः सन्दर्शत्यादौ द्वयोरणविधेयस्यले नान्वयः सदेवदशभिः पुत्रैर्भारं वहति गर्द
भीपुत्रेश्च भारवहनकर्तृत्वाभावेऽपि ताद्दशप्रयोगात् एकदेशविद्यमानतेमधारारेणैकदेशविद्यमानतायामुक्तसा
हित्यावच्छेदकतयान्वयः अतएव विद्यमानस्यार्थे तृतीयेति शाब्दिकाः वृत्तिधान्येन यनीगोत्रेण गार्ग्यः प्रकृत्यामि ५
रूपकरत्यादौ प्रकृत्यादिभ्यस्तृतीयाभेदार्थिका धान्याभिन्नधनवानिति गार्ग्याभिन्नगोत्रवानित्यर्थबोधः प्र॰
© Dharmartha Trust J&K. Digitized by eGangotri

कृतिपदस्य साहजिकाभिन्नरूपकपदस्य रमणीयतावानित्यर्थः तथा च साहजिकाभिन्नरमणीयतावानित्यर्थः कर्म
णा यमभिप्रैति स संप्रदानमिति पाणिनिसूत्रम् तत्क्रियाकरणीभूतेन तत्क्रियाकर्मणा यं संबंधीकर्तुमभिप्रैति क
र्त्ता स संप्रदानमिति सूत्रार्थः स्वेच्छकरणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वमिति पर्यवसितम् ग्रा
मं गच्छतीत्यादौ गमनकर्मकग्रामजन्यसंयोगादिभागित्वेनोद्देश्यस्य चैत्रादेः क्रियायां संप्रदानत्वाभावात् द्वारणम् य
करणीभूतेति तत्र ग्रामस्याकारणत्वात् दानादौ च देयादिकरणमिति लक्षणसमन्वयः विप्राय गां ददातीत्यादौ
जन्यफलप्रकारकेच्छाप्रयोजकत्वं चतुर्थ्यर्थः सुतमिति विप्रश्च तदेकदेशे जन्यत्वे धात्वर्थस्यापि कर्मतागवा
देरनिरूपकतासंबंधेनान्वयः स्वस्वत्वध्वंसप्रयोजकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागो ददात्यर्थः कृतिस्त्याख्यातार्थः एवं
च विप्रविषयकेच्छाजन्यफलप्रकारकेच्छाप्रयोजकगोवृत्तिस्वस्वत्वध्वंसप्रयोजकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानुकूल
कृतिमानित्यन्वयधीः गोघ्नं पितृस्वर्गमुद्दिश्य हन्तेर्गोदानेदानजन्यफलभागित्वेनोद्देश्यः नतु गोजन्यफ
लभागित्वे सति पित्रादेः संप्रदानत्वम् यदि द्वा गोश्यतः स्वर्गस्य मादृशिप्रतीतिस्त्रमिसंधिस्तदा ः हन्तृद्वारकतादृश
कर्मजन्यत्वं बाधम् केचित्तु धात्वर्थतावच्छेदकत्वेन फलविशेषस्य निरूपितत्वेनेच्छाविषयित्वं चतुर्थ्यर्थः स च धात्व
र्थतावच्छेदकेऽन्वेति एवं च विप्रनिरूपितत्वेनेच्छाविषयगोवृत्तिस्वस्वत्वध्वंसप्रयोजकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागानु
कूलकृतिमानित्यन्वयधीः अस्य स्वत्वस्य गोवृत्तित्वेनेच्छाविषयत्वस्य तेजुन्यत्वमपि लभ्यतएवेति तादृशगोजन्यस्वत्वनि
रूपकत्वेनोद्देश्यत्वं विप्रस्याहतम् एवं हरदायोदकमाषिञ्चतीत्यादौ संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्याप
रो धात्वर्थः हरिवृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः स च धात्वर्थतावच्छेदकसंयोगान्वयि हरिनिरूपितद्वितीयार्थोऽपि तादृश
द्रवद्रव्यक्रियान्वयि एवं च हरवृत्तित्वेनेच्छाविषयसंयोगावच्छिन्नद्रवद्रव्यवृत्तिक्रियावच्छिन्नव्यापारानुकूलकृ
तिमानित्यन्वयधीः न चैवं सिंचधात्वर्थतावच्छेदकद्रवद्रव्यक्रियायां द्वितीयार्थवृत्तित्वान्वयेन पयसा हरमासिंचती

© Dharmartha Trust J&K. Digitized by eGangotri

तिप्रयोगो न स्यात् तादृशक्रियायाश्च तादृशत्वादिति वाच्यम् तत्र धात्वर्थतावच्छेदकीभूतसंयोग एव दत्तवृत्तित्वाव
यात् द्रव्यस्य संयोग एव तत्र धात्वर्थ इति च न युक्तम् तथा सति फलावच्छिन्नव्यापाराबोधकत्वेन धातोरकर्मकत्वे धा
6 त्वर्थतावच्छेदकफलशालित्वाभावेन द्रव्यादेरकर्मकत्वापत्तेः अत एव अजां ग्रामं नयतीति वत्त्रहि कर्मकत्वे संयो
गावच्छिन्नव्यापारार्थकत्वेन तदवच्छेदकफलद्वयाभावात् तादृशक्रियावच्छिन्नव्यापारार्थकत्वे च तादृशक्रियायामेव
द्वितीयार्थवृत्तित्वान्वयात् तत्क्रियावच्छेदकसंयोगे च चतुर्थ्यर्थोद्देश्यत्वस्यैवान्वयात् फलवत्त्वेन तत्रैव वृत्ति
कल्पनात् न चैवम् अजां ग्रामं नयतीत्यत्रापि ग्रामस्य संप्रदानत्वापत्तिः तथाहि गमनानुकूलव्यापारप्रेरणा द्विधा
त्वर्थः द्वितीयाद्वयस्य वृत्तित्वमर्थः धात्वर्थतावच्छेदकगमने कर्तृदेशसंयोगे ग्रामपदोत्तरद्वितीयार्थस्य वृत्तित्वान्व
यः एवं च ग्रामवृत्तिसंयोगजनकाजावृत्तिगमनावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयधीः तथा च जन्यफल
भागित्वेनोद्देश्यत्वेन ग्रामस्याप्यस्य यात्र संप्रदानता यत्र त्वन्तयोरुद्देश्यत्वे च तथाप्यजां ग्रामं नयतीति शतिप्रयोगा
भवत्येवेत्याहुः वस्तुतस्तु त्यज्यमानद्रव्यस्वत्वभागित्वेनोद्देश्यत्वे संप्रदानत्वं त्यागविशेष्यमात्र ग्राह्यः तेन
विक्रियादौ केतृत्वादेर्न संप्रदानता आहादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वे किं तु प्रीतिभागित्वेनेति अत एव सं
प्रदाने चतुर्थीसंभवान्नमः स्वस्तीत्यादौ सप्तानेनाचतुर्थीविधानम् तत्र विप्राय गां ददातीत्यादौ विप्रादेः स्वत्व
भागित्वेनोद्देश्यत्वं एवं च कर्मणा यमभिप्रैति स संप्रदानमित्यस्यार्थो व्याख्येयम् कर्मणा दानकर्मणा यमभिप्रैति स्वत्वभा
गित्वेनोद्देश्यीकरोति तत्संप्रदानमिति एवं च संप्रदीयते अस्मिन्निति व्युत्पत्त्या संप्रदानसंज्ञापि संगच्छत एव वृत्तायोदक
मासिञ्चतीत्यादौ वृत्तादेः संप्रदानप्रयोगो गौणः चतुर्थी प्राप्त्यर्थः अत एव शत्रवे स्वं संचतीति मित्राय द्रुह्यतीत्यादौ
त्यादौ धात्वर्थतावच्छेदकफलोद्देश्यत्वाभावेऽपि चतुर्थीप्रयोग उपपद्यते विभागानुकूलस्यापि यावच्छिन्नव्यापारो ६
ऽपि च नय गमनानुकूलव्यापारः प्रेरणम् तदवच्छेदकविभागसंयोगादिशालित्वेन शत्रुमित्रयोरनुद्देश्यत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

तथा चत्वतो रक्तादिजन्यफलवत्त्ववाद्गुणजन्यफलं ङः त्वोद्दिष्टत्वजन्यफलवत्तार्थे दिवानशालित्वेनोद्देश्यत्वमेव
गौणत्वार्थः नचैवं गुरुम्प्रीतिमुद्दिश्य गुरुं प्रणाय दानं गुरवे ददातीति स्यात् तथाविधविवक्षाया मिष्टत्वात्
अत एव यत्र जनकसंबंधितामर्थविषयत्वं तत्र जनकस्य वस्त्रं ददातीति प्रयोगः यत्र वस्त्रजन्यफलभागित्वेनो
द्देश्यत्वं तामर्थविषयत्वं तत्र जनकाय वस्त्रं ददातीति प्रयोगो भवत्येव नचैवं ब्राह्मणाय ददाति इत्यादेः श्रीतिभागित्व
योद्देश्यत्वात् संप्रदानेन च तत्सर्थो नमः स्वस्तीत्यादिसूत्रानर्थक्यमिति वाच्यम् यत्किंचित्क्रियाकर्म
जन्यफलभागित्वेनोद्देश्यत्वस्य वगोणसंप्रदानत्वे नमः प्रभृतेः क्रियाभावेन पृथक्सूत्रप्रणायनात् नारदा
यरोचते कलहः वैश्णाय शतं धारयति इत्यादौ तु नारदादेः संप्रदानता किंतु रुच्यर्थानां प्रीयमाणः धारेरुत्तमर्ण
इति सूत्रद्वयेन संबंधमात्रे चतुर्थी विधीयते तत्र च रुच्यर्थकसंबंधो धात्वर्थतानारूढविशेष्यतेन विषयताविधीयते
नारदस्य रुचिविषयः कलह इत्यादावपि पुनर्दीनमगोहत्यमश्रहणधारणं वैश्णवशतकर्मकतारूष्णग्रहणा
श्रय इति बोधस्यान्वयधीः संप्रदानस्य कारकत्वे धात्वर्थतावच्छेदकफलवत्त्वनिष्ठादेकतयार रक्षेमत्यमनुमति
प्रकाशनेन कर्तृनिष्ठाश्रमायदानेनिष्ठा रत्वे नैवेति भागजनस्त्वजनकस्वीकारत्वेन संप्रदानत्वं वत्स्य भ्राद्धा
देः पित्रादेर्ने स्वीकारः इत्थं च गोदानीयादावपि संप्रदानत्वं गोर्भवतीत्युद्देश्यस्वरूपसिमाद्धः परकीयत्वविभाजन
विभागाश्रयत्वमपादानत्वम् वृक्षात्पर्णं पततीत्यादौ पतनाश्रयस्य पर्णादेरपादानत्ववारणाय परकीयेति
अत्र च पंचम्या विभागजनकत्वमन्योन्याभावप्रतियोगितावच्छेदकं चाधीयते विभागे आश्रयो माभावश्चैवं तो
धिकरणत्वान्वीयते पर्णं च हस्तदलं विभागजनकहस्तत्वमन्योन्याभावप्रतियोगितावच्छेदकपतनाश्रय
पर्णमित्यन्वयधीः अत्र च धात्वर्थतानवच्छेदकत्वेन विभागो विशेष्यः तेन हस्तेन त्वजतिवेगाद्भादौ तस्यानां
पादानत्वम् यत्र विभागावच्छिन्नक्रियायास्यजधात्वर्थत्वं तत्र विभागविशिष्टक्रियायाजनकत्वाभावान्न तथेति
तद्वारणं तथापि स्यन्दः संयोगावच्छिन्नक्रियायाश्च वपतथावर्थतया च स्वपतितविभागेपर्णाधः संयोगस्या

© Dharmartha Trust J&K. Digitized by eGangotri

का॰वा॰
७
7

जनकत्वादसंभवापत्तेः तदुपलक्षितजन्यत्वं तूभयत्रसमानमिति एवं च ग्रामादागच्छतीत्यादौ गमनादिजन्यवि-
भागाश्रयत्वेन ग्रामादेरपादानत्वम् एवमपायेऽपादानमिति पाणिनिसूत्रम् अपाये विभागे ध्रुवं निश्चलं तद्विभा-
गजनकक्रियाऽसमवायिति तदर्थः धावतोऽश्वात्पततीत्यादौ पञ्चमीनैतल्लक्षणानुशिष्टा तदर्थं वक्ष्यमाणं विधे-
यम् वस्तुतस्तु विभागजनकत्वं यत्र क्रियायामन्वीयते तत्क्रियाऽसमवायित्वमित्यर्थः तेन धावतोऽश्वात्पततीत्यादौ नाक-
व्याप्तिः अत्र पतनक्रियायामेव पञ्चम्यर्थविभागजनकत्वान्वयेनाश्वस्य तु धावनक्रियायां तदनन्वयादिति
विभागे ध्रुवमवधीभूतमित्यर्थः अवधित्वं च स्वरूपसंबन्धविशेषः प्रतीतिबलात्कल्प्यते तेन धावतोऽश्वात्पत-
तीत्यादौ सक्रियस्याश्वस्यापादानत्वेनानुपपत्तिः अत एव वृक्षपर्णयोः क्रियया पर्णस्य विभागेऽपि वृक्षस्यावधित्वो-
पपत्तिरिति तत्कश्चित् हिमवतो हिमं जलं तस्मादित्यत्र विभागावधित्वमपादानत्वम् अवधित्वमवधिमत्त्वं वा स्वरूपसं-
बन्धरूपं पञ्चम्यर्थः एवं च वृक्षाद्यवधिकविभागाश्रयं पर्णमित्यन्वयबोधः न चैवं वृक्षस्य हिमजलस्यापि स्यादि-
ति वाच्यम् स्वप्रतियोगिकत्वविशिष्टसंयोगस्यैव स्वावधिकत्वविशिष्टविभागाश्रयत्वस्य तस्मिन्नभावात् रक्ष्ये-
णापादानपदे पञ्चमीनानार्थमेवेति न चैवं परकीयसंयोगजन्यविभागाश्रयत्वेन वृक्षात्पर्णे स्पन्दतरस्यापि स्यादिति वा-
च्यम् परकीयसमवेतक्रियापदेन सकर्मकधात्वर्थस्य विवक्षितत्वात् आग्राद्विभेति शत्रोः परित्रायतीत्यादौ पञ्चमीना-
पादाने किन्तु भीत्रार्थानां भयहेतुरिति सूत्रेणानुशिष्टाऽपि पञ्चम्या हेतुत्वमर्थः धातोर्यथायथं भयाभाव
स्यार्थः पञ्चम्यर्थश्च हेतुत्वम् धात्वर्थो भयं धात्वर्थतावच्छेदकं च भयत्वेनेति अत्र व्याख्यानार्थस्यापत्वे परित्राणानु-
त्वव्यापारस्य रक्षेश्च हेतुपञ्चम्येवोपपत्तौ पृथक्सूत्रप्रणयनं तस्यैव प्रपञ्चार्थमिति तथा च माद्वृतकमयाश्र-
यः शत्रुहेतुकभयाभावानुकूलव्यापारवानित्यन्वयधीः एवं रूपारूं धं वा रयतीत्यादौ पञ्चम्याः पतनं द्वितीयाया
धात्वर्थैकदेशप्रतिबन्धान्वितत्वं धातोः प्रतिबन्धानुकूलव्यापारोऽर्थः तथा चाधर्म्मानुकूलपतनप्रतिबन्धानु-
कूलव्यापारानुकूलत्वमिति निरूपितत्वार्थस्तत्त्वनयुक्तः यत्र कूपे कस्यापि पतनं न प्रसिद्धं तत्रासंभवात् अतएव हि

© Dharmartha Trust J&K. Digitized by eGangotri

तीयायाः पतनं पंचम्या धात्वर्थान्वयित्वं धातोस्तदभावानुकूलव्यापारोऽर्थः तथा च कूपवृत्तिसंयोगपतनाभावानुकू
लव्यापारविषयकयत्नवानित्यर्थोऽपि न युक्तः घटेधस्य पतनस्य प्रसिद्धत्वेन तदसंभवात् अत एव द्वितीयायाः पतनम्
पंचम्या धात्वर्थान्वयित्वमस्तु धातोस्तदभावानुकूलव्यापारोऽर्थः तथा च कूपवृत्तिसंयोगपतनाभावानुकूलव्यापार
विषयकयत्नवानित्यर्थोऽपि न युक्तः घटेधस्य पतनस्य प्रसिद्धत्वेन तदसंभवात् किन्तु धातोरभावानुकूलव्यापारः पंच
म्या वृत्तित्वं द्वितीयायाः प्रतियोगित्वमनुयोगित्वं वा धात्वर्थतावच्छेदकीभूताभावान्वितमर्थः प्रभावः कूपादिस
मभिव्याहाराद्विशरणपतनादिना संबंधेन बोध्यः एवं च पतनादिसंबंधेन कूपवृत्तिसंयोगप्रतियोगिकाभावानुकूलव्या
पारविषयकयत्नवानित्यन्वयधीः एतस्मात्सविषाणाद्दंशुं मित्रं वारयतीत्यादौ च सविषाणस्य मित्रस्य च भोजनम यस्मि
प्रसिद्धत्वमपि भोजनादिसंबन्धेन सविषाणवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानित्य
न्वयधीः एवं कूपात् ध्वंसं सविषाणाद्दंशुं मित्रमित्यत्र यथायथं धातोः पतनं भोजनमभावानुकूलव्यापारश्चार्थः पं
चम्याश्च यथायथं स्वार्थवृत्तित्वादि द्वितीयार्थकर्तृत्वान्वितवृत्तित्वविशिष्टवृत्तित्वकर्मत्वं वार्थः द्वितीयायाः क
र्तृत्वमर्थः धात्वर्थतावच्छेदकीभूताभावे धात्वर्थस्य पतनादेरधिकरणत्वेन द्वित्वावच्छिन्नपंचम्यर्थवृत्तित्वादि द्वि
तीयार्थोभयस्य च प्रतियोगित्वेनान्वयो बुमतिर्वेविस्यात् एवं पतनसामान्ये कूपवृत्तित्वाधकर्तृत्वोभयाभावा
नुकूलव्यापारविषयकयत्नवानित्यादयस्य भोजनसामान्ये सविषाणकर्मकमित्रकर्तृत्वोभयाभावानुकूलव्यापार
विषयकयत्नवानिति द्वितीयस्य बोधः एवमेवाकाशं न पश्यतीत्यत्रस्मादावाकाशविषयकदर्शनस्य घटद
र्शनस्याप्रसिद्ध्यावच्छिन्नस्य नान्वयबोधो दुर्वार इति तत्र द्वितीयाया विषयित्वरूपं कर्मत्वं तत्र च यावद्द
ष्टृत्वं द्वित्वं बोध्यते धात्वर्थनाच लौकिकभिन्नजन्यप्रमात्वं तेन च द्वित्वावच्छिन्नद्वितीयार्थान्वितजन्यस्यान्व
यः प्राप्यत्वानस्य तादृशोभयाभावान्वितनिरूपकत्वमर्थः तथा च लौकिकभिन्नजन्यप्रमात्वसामान्ये द्वयाकाशवि

© Dharmartha Trust J&K. Digitized by eGangotri

का॰वा॰
८

6

षयित्वघटहित्तितोऽभयाभावनिरूपकोघटस्तस्यान्वयबोधः नचाकाशे नपश्यत्यभावस्तत्रादौ समवायसंबंधेनाभाववृत्तित्वाप्र
सिद्ध्यानोक्तक्रमेण समंजसमिति वाच्यम् तद्विधातोर्निरूढलौकिकप्रत्यक्षप्रतियोगित्वं समवायस्यार्थः द्वितीया
यास्तु विषयिप्रतियोगित्वमभावानुयोगिकत्वं चेति चार्थः एकदेशे च विषयित्वे प्रकृत्यर्थस्याकाशादेर्निरूपकत्वे
नान्वयः तथा च समवायसंबन्धसामान्ये आकाशविषयिप्रतियोगिकत्वनिरूढलौकिकप्रत्यक्षप्रतियोगिकत्वाभा
वानुयोगिकत्वैतद्द्वित्वावच्छिन्नस्य योऽभावस्तन्निरूपकोऽभावस्तस्यान्वय इत्याहुः केचित्तु तद्धातोर्निरूढलौकिकप्रत्यक्ष
समवायोऽर्थः द्वितीयायास्तु विषयिप्रतियोगिकत्वमभावानुयोगिकत्वं द्वित्वं चार्थः विषयित्वे चैकदेशे प्रकृत्यर्थस्याका
शस्य निरूपकतयान्वयः तथा च निरूढलौकिकप्रत्यक्षसमवाये आकाशविषयिप्रतियोगिकत्वाभावानुयोगिक
त्वोभयत्वावच्छिन्नस्य योऽभावस्तन्निरूपकोऽभावस्तस्यान्वयबोधः अनयैव दिशा अप्रसिद्धस्थले बाधाद्यूह्यमात्रमपि वदति
हिमवतो गंगा प्रभवतीत्यादौ न पञ्चम्यादेरवधित्वं धात्वर्थो नाचोऽपि निर्देशोऽधिकरणे तथा सति जनिकर्तुः प्रकृतिरित्यनेनापादानत्वे
भुवः प्रभव इति सूत्रेण पञ्चमीविधानात् किं तु प्रकर्षेण भवनं प्रभवः प्रकाशः आद्यवृत्तिः संयोग इति यावत् स एव धात्व
र्थः वृत्तिः पदार्थः प्रकृते भूसंबन्धमेव पञ्चम्यर्थः संयोगध्वंसाव्यवहितोत्तरवर्तित्वं माख्यातार्थः आश्रयता तथा च हिमा
लयसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथिवीसंयोगाश्रयतावती गंगेत्यन्वयधीः वैकुण्ठात्काशीतो वा गंगा
प्रभवतीत्यप्रयोगात् अव्यवहितेति आद्येति च वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरक्षणे भूसंबन्धस्य काशीसंयोगध्वंसा
व्यवहितत्वेन चाद्यत्वस्याभावात् वल्मीकाग्रात्प्रभवति धनुः खण्डमित्यादावप्येवमेव धात्वर्थः परन्तु व
ल्मीकाग्रदेशावच्छिन्नवृत्तिः पदार्थ इति विशेषः कृष्णात्पराजयते शिशुपालः अध्ययनात्पराजयते बालकः शिशुपालादि
प्रयुज्यमानात्पराजयतेरणश्यादौ च धातोरसहिष्णुतापञ्चम्याः कर्मत्वमाख्यातस्याश्रयत्वमर्थः कृष्णं न सहते इत्यन्वय ८
ने सूत्रेण सहते इति विवरणात् असहिष्णुताद्यर्थविशेषोऽपि भवाशक्यत्वं वाशक्यत्वान्वेत्यन्ये वा इत्यन्ये च चरमौ विषयि

© Dharmartha Trust J&K. Digitized by eGangotri

विषयकद्वेषवान् तत्सविषयकाभिमानाश्रयत्वज्ञानवान् वा स्मात्यस्य युद्धात्पराजयनविषयकाश्रयत्वज्ञानवान् इत्यन्व-
यबोधः विप्राद्दुर्गमाद्रक्षमादौ पंचम्या यथोक्तविनियोगार्थानन्वयत्वम् चौराद्रक्षमाद इत्यादौ चोरस्य स्वत्वाभावेन
तदसंभवात् धातोरथविषयकस्य विनियोगफलकस्वीकारार्थोनन्वयत्वजनकस्वीकारः विप्राद्दुर्गमादते चौराद्रक्षमादौ चो
रस्याप्रसंभवात् पंचम्यर्थविनियोगस्य चाव्यवहितोत्तरत्वसंबन्धेन धात्वर्थतावच्छेदकविनियोगेऽन्वयः अव्यवहितो
त्तरत्वं च स्वसमानविषयकपूर्वरूपान्तरीयविनियोगाव्यवहितत्वम् इत्थं तेन पूर्वतः प्रतिगृह्य विप्रेणादत्तं धनं अव्यवहितस्व
द्वारा दत्तेऽतिन प्रयोगः इत्थं च विप्रीयपरत्वविनियोगाव्यवहितोत्तरधनस्वत्वविनियोगफलकस्वीकारवा
नित्यन्वयबोधः अधर्माज्जुगुप्सते इत्यत्र पंचम्याः कर्मत्वं धातोर्निन्दार्थः अधर्मं निन्दतीत्यर्थः अधर्माद्विरमतीत्यादौ धा
तोः करणत्वेऽरमकरणम् पंचम्याः कर्मत्वं संबंधकरणत्वं वा तेन अधर्मं कर्तव्यत्वेन करोतीत्यर्थः एवं धर्मात्प्रमाद्यती
त्यादौ पंचम्या विषयित्वं धातोरनवधानं वा अनवधानस्य चाश्रयत्वमर्थः धर्मविषयकानवधानाश्रय इति शाब्दधीः उ
पाध्यायादधीते शिष्य इत्यादौ धातोः स्वविषयकप्रश्नोत्तरविरोधिज्ञानं पंचम्याः संबंधित्वं धात्वर्थतावच्छेदकप्र
श्नोत्तरविशिष्टाख्यानस्य प्रकृतिरर्थः उपाध्यायसंबंधिस्वविषयकप्रश्नोत्तरविरोधिज्ञानप्राप्तिकृतिमान् इत्यन्वय
धीः इत्थं च धूमाद्वह्निमानित्यादौ पंचमीनाम्पारादेनेकिंचायोगाभावात् किं तु जनकत्वज्ञापकत्वरूपजनकत्व
व्यापकत्वे जन्यत्वज्ञाप्यत्वे वा देशत्वे तन्मते वा देशतावितिसूत्रेणानुशिष्टा न चैवं जनिकर्तुरिति सूत्रं व्यर्थम् कारणत्व
चतीर्थत्वेऽत्र वदत्युद्धायनेस्मादावपि उपनिरूपधात्वर्थनिरूपितदेशत्वस्यापि देशतावितिसूत्रेणैव संभवादिति वाच्य
म् उपनेरदेशत्वेऽपि स्वावधिकत्वादुपनिरूपितत्वाद्देशस्वरूपसंबंधस्य देशत्वाद्यत्वेन देशतावितिसूत्रेणाप्राप्त्या
अप्रभावात् अधिकरणत्ववचनसंबंधः संबंधस्य संयोगरूपस्य द्विष्ठत्वात् वृक्षाद्देशपिक्षुणशाधारतापत्तेः न च कुण्डन
व्दरधर्मे इति वाच्यम् नदिस्वधर्मसंबन्धोऽधिकरणत्वपर्यवसितम् स्वधर्मत्वं वाध्येयत्वं स्वाधेयत्वं च यदिस्वनिरूपि

© Dharmartha Trust J&K. Digitized by eGangotri

का.वा. नाधिकरणत्वसंबंधित्वं तदानीमाश्रयः अयमत्रेदं वचम् नापि यत्र यत्स्थितये प्रयेव अपेक्षणीयम् अधिकरणत्वं यत्र
८ येन अपेक्षणीयं च कार्यस्य समवायिकारणं स्थितये तदादेर्भूतलादिः तत्प्रयेव जात्यादेः समवायि अभावसमवाययोः
9 स्वरूपसंबंधीति वाच्यम् अपेक्षणीयत्वं हि नजनकत्वम् अतीन्द्रियजात्यादावभावात् तस्य लौकिकप्रत्यक्षाभावेऽसन्नि-
कर्षाद्यहेतुकत्वेनाजनकत्वात् एतादृशे घटाद्यधिकरणत्वानापत्तेश्च नाप्यधिकरणत्वं अत एव पंकजकोरकान्तरामन्त्र
वित्तपुष्पमरस्याप्यधिकरणे पतनाप्रसिद्ध्यानाप्ताप्तिः गुणक्रियाजात्यादेश्च तत्समवायित्वे अभावसमवायानां च तत्स्व-
रूपसंबंधित्वं एवं परंपरासंबंधेनापि निर्वाह्यमिति वाच्यम् अनवगमात् भूतलेव रश्मौ तद्रूपेण सम्प्रसर्पणं ना-
संयोगोरवात् अननुभवाच्च किं तु शक्तियोगित्वात् योगित्वाधेयत्वाधिकरणत्वेऽविलक्षणप्रतीतिसाक्षिकः स्वरूपसं-
बंधविशेषः स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत् तत्र गेहे पचतीत्यत्र पाकस्याधः संतापनस्य साक्षात् गेहे तत्त्वेनापि
कटेत्वहितपरंपरया अधिकरणत्वमाधेयत्वं वा पाकादिक्रियात्वेन समन्वयः स्थाल्यामोदनं पचतीत्यत्राधःसंताप-
नस्य पाकस्य साक्षात् स्थाल्याम् हि तत्त्वेपि कर्मेव हितपरंपरयाऽधिकरणत्वमाधेयत्वं वा समन्वयः पाकाद्यन्वेति अन्यथ
बलेन तथैवमुप्रत्ययेऽपि तिष्ठन्नाः वराहः कर्तृकर्मद्वारा हि नाम साक्षाद्द्वारयत्क्रियां यपकर्तृत्वे क्रियाश्रयत्वेनाधिकर-
णं स्वतन्त्रम् रथेव कर्तृकर्मान्तरहारा क्रियाश्रयत्वे सति तत्क्रियोपकारकं अधिकरणमिति वस्तुतस्तु परंपरया क्रि-
याश्रयत्वमेवाधिकरणत्वम् अत एव प्रागयोनदीर्घदण्डादिकाष्ठादिचालनक्रियाबलेन गृहीतात्तद्वर्तिन करणे कर्त-
हा क्रियानाश्रयत्वेपि गृहस्योरे पचतीति प्रयोगः नवेवं परंपरयेति अर्थः अधः संतापनं अधोवह्निसंयोगात्तत्कल्क
एवं स्थाल्यादिव्यापारस्य च साक्षात्काष्ठादिव्यापारेऽपि तत्वेपि काष्ठेवह्नौ वा पचतीति प्रयोगाभावात् यदि गत्वा तीतिवत्साक्षि
रूपात्तीतिप्रयोगाभावात् अपि तत्र इमिति नैवं क्रियान्तरूपितात्रिकरणत्वस्यैव सर्वत्र सम्प्रसर्पणत्वेऽविनाक्रियायो- ८
गम्यत्वेहस्तमादिप्रयोगस्यादिति वाच्यम् दृष्टत्वादिति वैयाकरणाः अधिकरणत्वमाधेयत्वं वा समन्वयः स च यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

क्रियान्वयित्वं कारकव्यवहारः अतएव भूतले घटः इत्यादौ क्रियासम्बन्धाभावात् भूतलाधेयो घट इति शाब्दबोधोपपत्ते-
रिति न्यायविदः गेहे स्थाल्यामोदनं पचतीत्यत्र निरूढत्वसंबंधेन गेहाधिकरणकस्थाल्यधिकरणकओदनकर्मकपा-
कानुकूलकृतिमानित्यन्वयधीः भूतले घटः इत्यादौ सप्तम्या अधिकरणत्वमर्थः तच्च प्रकृत्यर्थस्याश्रयत्वेन प्रथमा-
न्तार्थस्य च निरूपकत्वेनान्वयः भूतलनिष्ठाधिकरणतानिरूपको घट इत्यन्वयबोध इति प्राञ्चः निरूपकत्वादेः संबन्ध-
स्य प्रतियोगितावच्छेदकत्वाभावात् नञर्थान्वयानुपपत्त्या आधेयत्वं सप्तम्यर्थः तच्च प्रकृत्यर्थस्य निरूपकतया प्रथ-
मान्तार्थस्य चाधिकरणतयान्वये भूतलनिरूपिताधेयत्ववान् घट इत्यन्वयबोध इति नव्याः चर्मणि द्वीपिनं हन्तीत्यत्रा-
दौ निमित्तसप्तमी निमित्तत्वमुद्देश्यत्वं तच्च फलत्वेन फलवत्त्वेन वा इच्छाविषयत्वम् प्रथमे मशकनिवृत्त्यै धूमं करोती-
ति द्वितीये तु चर्मणि द्वीपिनं हन्तीत्यादिः चर्मादेः सिद्धत्वादिच्छाविषयत्वाभावे साध्यीभूतद्वयेऽपि विनियोगरूपफ-
लवत्त्वेनोद्देश्यत्वात् अत्र च यथायथं तादर्थ्योक्तासप्तम्यर्थः तस्य च धात्वर्थे प्रयोज्यत्वसंबंधेनान्वयः तथा च मशकनि-
वृत्तिविषयेच्छाप्रयोज्यधूमकरणाश्रयः चर्मविषयकयत्नेह विनियोगेतिनियामकः सकर्मकधातोः कर्मसमभिव्या-
हारेण कर्मप्रकारकबोधजनकता यथा द्वीपिनं हन्तीत्यादौ अकर्मकधातौ च कर्मविशिष्टस्वार्थे शक्त्या अविशेषाद् रजनी-
तयेयद्दूरेतीत्यत्र उदयगिरिशिखरं स्मारो हन्तीत्यर्थे करणात् कर्मविशिष्टबोधजनकत्वमविशिष्टम् अत्र रजनीतय-
स्सूर्योदयाजन्यत्वेऽपि निमित्तत्वेन ज्ञानविषयत्वेनोद्देश्यत्वं तेन लोकानां रजनीत्वयज्ञानार्थं यद्दूरे इत्यर्थः शरदि पुष्प-
तिसप्तच्छदः इत्यादौ अधिकरणसप्तम्यर्थः शरदुत्पत्तिकपुष्पाश्रयाः सप्तच्छदा इति वाक्यार्थः न च शरदुत्पत्तिकपुष्पाश्र-
ये चंपकादावपि तथाप्रयोगः स्यादिति वाच्यम् पुष्पच्छदस्य पुष्पाश्रयत्वे तच्छे समानवृत्तिविषयतया सप्तच्छदवृत्ति-
त्वस्यापि पुष्पे सत्त्वाभावात् तदवच्छेदेन तदुत्पत्तिकान्वयस्य कुसुमसिद्धत्वात् चंपकादेः पुष्पत्वावच्छेदेन शरदुत्पत्ति-
कत्वाभावेन तथाप्रयोगाभावात् धातोः सप्तच्छदीयपुष्पे तद्वत्तेति केचित् सति सप्तम्याः सामानाधिकरण्यमर्थः
तच्च क्वचित् कालिकं क्वचिद्दैशिकं तथा हि समानकालीनत्वं पर्यवसन्नम् गोषु दुह्यमानास्वागतः दुग्धास्वागत इत्या

© Dharmartha Trust J&K. Digitized by eGangotri

का० वि०

१०

दोग्धृत्वसमानकालीनत्वसम्बन्धार्थे दोहनमात्रस्य न विरूपकत्वेनान्वयः सन्निधाप्यादि दोहनकालीनत्वाप्रयोगात्
नापि दोहनस्य धात्वर्थतावच्छेदकत्वेनानुपस्थितेः किन्तु दारीवृक्षो गच्छतीत्यत्र यथा परंपरया वृक्षविशेषणतापन्न
त्वरणसमानकालीनत्वं गमने भासते तथा गोविशेषणकर्मतापन्नस्यैव दोहनस्य समानकालीनत्वं गमने भा
सत इति इत्थं च तादृशदोहनसमानकालीनगमनानुकूलातीतकृतिमान् निम्नागस्य वा वाक्यार्थः दुग्ध्वा गां गतवान् मा
दोहनत्वान्वयः दोहनस्यातीतत्वेन बाधात् किन्तु वर्तमानध्वंसप्रतियोगिकृतिजन्यदोहनकर्मतापन्नायां गोभाग
न इति वाक्यार्थः गोविशेषणकर्मताविशेषणदोहने कृतिविशेषणप्रतियोगित्वविशेषणतापन्नस्य वर्तमानध्वं
सस्य समानकालीनत्वमागमने भासते तथा च तादृशवर्तमानध्वंससमानकालीनागमनानुकूलकृतिमानिति वा
क्यार्थः गुणकर्मान्यत्वे सति सत्तावानित्यादौ वैशेषिकः तद्वदि गुणकर्मान्यत्वसामानाधिकरण्यस्य सत्वे बोधात् यद्य
पि यस्य भावेन भावलक्षणं इति सूत्रे क्रिययोः सामानाधिकरण्ये सप्तमीविधानान्नार्थयोः सामानाधिकरण्ये सप्त
मीत्युक्ता तथापि गुणकर्मान्यत्वे सति सत्तावानित्यादिप्रयोगदर्शनात् सत्वे भावपदं धर्मपरतया व्याख्येयं तस्य
गमनीयम् यस्य धर्मेण धर्मान्तरे निरूपकस्य सामानाधिकरण्यं प्रतिपाद्यते तत्र सप्तमीति सूत्रार्थः यस्य क्रियया यस्य
क्रियान्तरं लक्ष्यते इति व्याख्यानं तु शाब्दिकाभिप्रायिकम् ॥ इति श्रीमहार्थसारपुत्रवर्यभवानन्दवागीशविरचितं
षट्कारकविवेचनं समाप्तम् ॥ रामात्रिवस्त्रसोमे श्रीविक्रमार्कस्य वत्सरे [illegible] कारकाणां विवेचनं लिखितं पर
म ॥ गोपालविठ्ठलाख्यार्थं परार्थं पाठितं प्रियम् समालेखि विठ्ठपैरायज्ञेश्वरशोध्यतां त्वतः २ ॥ संवत् १८०२ ॥

श्री रणवीर पुस्तकालय सं० ५५ नं० २३६ मंदर श्री रघुनाथ जी

© Dharmartha Trust J&K. Digitized by eGangotri